CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 518

Title Ṣaṭpañcāśikā with Com.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 518 Subject: Jyotiṣa

Title: Ṣaṭpañcāśikā with com.

Author: pruthuyaśas Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 9.5" by 5" Extent: 27 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Incomplete

अधुनालग्नचतुर्थसप्तमदशमानांचतुर्णांस्थानानांविचारप्रविभागमाह च्युतिर्विलग्नेति च्यु
तिः च्यवनंस्थानपरिभ्रंशः विलग्नात्तात्कालिकात्पृच्छालग्नात् च्युतिर्ज्ञेया पृच्छांपृच्छति अमु
कस्थानान्मेच्युतिर्भविष्यतिवानेत्येतत् विलग्नात्ज्ञेयम् एवंहिबुकाच्चतुर्थस्थानात् गृहस्थलस्थानानांवृद्धिर्ज्ञेया मध्यंदशमस्थानंतस्मात्प्रवासोज्ञेयः प्रवसनंप्रवासः अन्यदेशगमनं अस्तम

च्युतिर्विलग्नाद्धिबुकाच्चवृद्धिर्मध्यात्प्रवासोस्तमयान्निवृत्तिः

यात्सप्तमस्थानान्निवृत्तिः प्रवासान्निवर्त्तनम् कथमेवमुच्यते चरस्थिरद्विस्वभावात्मकत्वेन य
तउक्तम् प्रश्नविलग्नकालात् प्रश्नः पृच्छाप्रश्नेविलग्नंप्रश्नविलग्नंतस्यकालः समयस्तस्मात् तेन
चरराशौलग्नगतेस्वामिनायुतेदृष्टेवाशुभग्रहाणामन्यतमेन वायुतेदृष्टे परिशिष्टग्रहसंयोगसं-
दर्शनरहितेच्युतिर्भवति अन्यथानभवत्येव यतउक्तंवाच्यंग्रहैः कारणभूतैः वाच्यंवक्तव्यम्

सर्वमेवैतत् एवंस्थिरराशौपापग्रहदर्शनयोगरहितेपिनभवत्येव यतोवक्ष्यति वृषसिंहवृ-
श्चिकघटैर्विवृद्धिस्थानंगमागमौनस्तइति तथाद्विस्वभावेभवतिनवा स्वामिशुभग्रहदर्शनाधि-
क्यात्पापानामल्पत्वाच्चभवति अन्यथानभवत्येव एवंचतुर्थस्थानस्यसामान्यतयैवशुभग्रहस्वा
मिदर्शनयोगात् ग्रहादीनांवृद्धिः अन्यथाप्यपचयः अथोप्रवासः दशमस्थानस्यचरराश्यात्मकत्वा

वाच्यंगृहैः प्रश्नविलग्नकालात् गृहंप्रविष्टोहिबुकेप्रवासी २

त् पापग्रहदर्शनात्प्रवासः अन्यथास्वामिशुभग्रहदर्शनयोगाच्चनप्रवासः सप्तमस्थानस्यच
रराश्यात्मकत्वात् पापग्रहदर्शनान्नप्रवासान्निवृत्तिः अन्यथास्वामिसौम्यग्रहदर्शनयोगाच्चनि
वृत्तिः गृहंप्रविष्टोहिबुकेप्रवासी हिबुकेचतुर्थस्थानेप्रवासीविदेशस्थोनरो गृहंवेश्मप्रविशेनवे २
तिवक्तव्यम् चतुर्थस्थानेस्वस्वामिदृष्टेयुक्तेवागृहंप्रविष्टो न्यथानप्रविष्टइति हिबुकगृहेप्रविष्टंप्र

प्रविष्टंप्रवासिनंविद्धि हिबुकास्तमध्यांतरगेग्रहेचपथिवर्ततेपुरुषइति तस्यप्रविष्टस्यग्रहस्ययाः
वंतिदिनानिव्यतीतानितावंत्येवगृहंप्रविष्टस्यप्रवासिनोगतानि अथवा यावद्भिर्दिनैः सग्रहः च
तुर्थस्थानेयास्यति तावद्भिरेवप्रवासीगृहंप्रविश्यति एतद्दूरगतस्यागमनंचेत् यस्मिन्वक्ष्यमा
णेयातेसतिवक्तव्यम् नान्यथेति एतच्चपुरस्ताद्विस्तरेणाभिधीयतइति २ अधुनातन्वादीनां
द्वादशभावानांशुभाशुभज्ञानमाह योयोभावइति तनुधनसहजसुहृत्सुतरिपुजायामृत्यु
धर्मकर्मायव्ययाइतिद्वादशभावाउक्ताः कुजशुक्रज्ञेंदुर्कज्ञशुक्रकुजजीवसौरियमगुरवः
इतिराश्यधिपाउक्ताः तथा क्षीणेंदुर्कयमाराःपापाज्ञैःसंयुतःसौम्यइतिग्रहाणांपापसौ
म्यत्वमुक्तम् तथा दशमतृतीये नवपंचमे चतुर्थाष्टमेकलत्रंच पश्यंतिपादवृद्ध्याफला-
निचैवंप्रयच्छंति सर्वमेतत् दृष्टिफलमुक्तम् तेनपृच्छासमये यः कश्चिद्भावस्तन्वादिकःस्वा
मिनात्मीयनाथेन दृष्टोऽवलोकितः तस्यभावस्यवृद्धिरुपचयोस्तिविद्यते अथवातेनैवस्वा
मिनायुतःसंयुक्तः तस्यापिवृद्धिरस्ति सौम्यैर्वास्यात् सौम्यग्रहाणांबुधगुरुशुक्रपूर्णचंद्राणां

अन्यतमेनवायुतोदृष्टोवाभावःस्यात् भवेत् तस्यापिवृद्धिरस्तिवर्द्धनंवक्तव्यम् पापैरेव
मिति एवमनेनप्रकारेण पापैःपापग्रहैरपि रविक्रूरयुतबुधभौमसौरिक्षीणचंद्राणामन्यतमेनयोयोभावोयुक्तोदृष्टोवातस्यभावस्यहानिरपचयोनिर्देष्टव्या वक्तव्या कस्मा

योयोभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्ति
वृद्धिःपापैरेवंतस्यभावस्यहानिर्निर्देष्टव्यापृच्छतांजन्मतोवा ३

दिति तदेवाह पृच्छतांजन्मतोवेति पृच्छतांपृच्छासमयेनराणां जन्मतोवाजायमानानां
तथाचोक्तम् जातके पुष्णांतिशुभाभावान्सूर्यादीन्घ्नंतिसंस्थिताःपापाः सौम्याःषष्ठेरिप्राः ३
सर्वेनेष्टाव्ययाष्टमगाः इतिजन्मन्याधानकालेप्रश्नकालेवेति ३ ७ ७

अधुनाप्रश्नसमयेलाभादोशुभाशुभज्ञानमाह सौम्यइति सौम्यानांशुभानांग्रहाणांबुधगुरुशुक्रपूर्णचंद्राणामन्यतमेविलग्नेस्थितेयदिवास्यसौम्यग्रहस्यवर्गेतत्कालंविलग्नेप्रामेगृहहोराद्रेष्काणनवमभागद्वादशांशकस्त्रिंशःवर्गःप्रत्येतव्योग्रहस्ययोयस्यविनिर्दिष्टइतिवर्गलक्षणमुक्तम् अथशीर्षोदयपृच्छालग्नेमेषाद्याश्चत्वारःसधन्विमकराःक्षपाबलाज्ञेयाः पृष्टोदयाविमिथुनाशिरसान्येह्युभयतोमीनः इतिराशिपृष्टोदयत्वंशीर्षोदयत्वंचोक्तम् एतेषामन्यतमेयदि

सौम्येविलग्नेयदिवास्यवर्गेशीर्षोदयेसिद्धिमुपैतिकार्यम्
अतोविपर्यस्तमसिद्धिहेतुःकृच्छ्रेणसंसिद्धिकरंविमिश्रं ४

विलग्नेपृच्छतोभवति तत्कार्यंसिद्धिंसाध्यतामुपैतिगच्छति अतोविपर्यस्तमिति अतोस्मात्पूर्वोक्ताद्विपर्यस्तंविपरीतमस्ति असिद्धिहेतुरसाध्यतायाःकारणम् एतदुक्तंभवति पापग्रहेणविलग्नस्थेनपापवर्गेवाविलग्नगतेपृष्ठोदयेवालग्नगतेप्रष्टुःकार्यंनसिद्ध्यति कृच्छ्रेणसंसिद्धिकरंवि

मिश्रं तत्पूर्वोक्तंविमिश्रितंसंकीर्णंयदिभवेत्तदाप्रष्टुः कृच्छ्रेणाक्लेशेनसंसिद्धिकरंकार्यसाधकंभव
तिएतदुक्तंभवति पापसौम्योद्वावपिलग्नस्थौभवतः पापसौम्योवर्गस्थौवाउभयोर्दयोर्मीनोवा
शीर्षोदयः पापयुक्तः पापवर्गस्थोवा पृष्ठोदयः सौम्ययुक्तः सौम्यवर्गस्थोवा उभयोदयो
वा तदाक्लेशेनसिद्धिर्भवति तत्रचबलाधिक्यान्निश्चयइति ४ अधुनानष्टलाभज्ञानमाह

होरास्थितःपूर्णतनुःशशांकोजीवेनदृष्टोयदिवासितेन

होरास्थितइति शशांकश्चंद्रः पूर्णतनुःपरिपूर्णमंडलः दशम्यामारभ्य कृष्णापंचमीया
वत् पूर्णतनुर्भवति तथाचयवनेश्वरः मासेचशुक्लप्रतिपत्प्रवृत्तेः पूर्णःशशीमध्यबलो
दशाहे श्रेष्ठोद्वितीयेल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैव एवंपूर्णतनुःशशांकः ४
होरायांलग्नेस्थितः होरेतिलग्नंभवनस्यचार्द्धमिति लग्नस्यहोराव्यपदेशः तत्रस्थः

शशी जीवेनगुरुणादृष्टोऽवलोकितः यदिवासितेनशुक्रेणदृष्टोभवति यदिवेत्यत्रविनिपातो
विकल्पे क्षिप्रमाश्वेवप्रनष्टस्यापहृतस्यद्रव्यादेर्लब्धिंलाभंकरोति लाभोपयातइति अ
थवा शुभः सौम्यग्रहः बलवान् वीर्ययुतोलाभेएकादशस्थानेउपयातः प्राप्तोभवति

क्षिप्रंप्रनष्टस्यकरोतिलब्धिंलाभोपयातोबलवान्शुभश्च ५

तथापि चशब्दात्क्षिप्रमेवनष्टस्यलब्धिंकरोतीति ग्रहाणांस्थानदिक्चेष्टाकालबलंजा
तकेप्रोक्तम् बलवान्मित्रस्वगृहोच्चैरित्यारभ्यस्वदिनादिषुशुभशुभाइत्येतदंतम् ५
अधुनाहृतनष्टमुष्टिगतचिंतितानांधातुमूलजीवानांपरिज्ञानमाह ५ ५

स्वांशेति यः कश्चिद्ग्रहः तत्कालंस्वांशे आत्मीयनवांशके स्थितः विलग्ने प्रश्नलग्ने तत्कालोदितंस्वां
शंतस्यैवग्रहस्यात्मीयंनवांशकंतच्चपश्यत्यवलोकयति तदाप्रष्टुः धातुचिंतांवदेत् स्वर्णादिमृ
त्तिकांतंधातुद्रव्यम् एतदुक्तंभवति स्वांशकस्थोग्रहः स्वांशकयुक्तंलग्नंपश्यति तदाधातुचिं
तांप्रवदेत् अथवालग्नगतंस्वांशंनपश्यति तदात्रिकोणे नवमस्थानेस्थितंतमेवस्वांशंप-
श्यति पंचमेस्थितंतमेवस्वांशंपश्यति नवमस्थानं पंचमस्थानंवास्वांशकसमेतंपश्यतीत्यर्थः

स्वांशेविलग्नेयदिवात्रिकोणेस्वांशेस्थितः पश्यतिधातुचिंताम्

यतोलग्नपंचमनवमानामेकएवांशः तुल्यकालमुदेति एतदुक्तंभवति स्वनवांशकस्थोग्र
होलग्नपंचमनवमानामन्यतमंस्वांशकयुक्तंपश्यति तदाधातुचिंतांवदेत् तत्रापिधाम्याधा
म्यप्रविभागोग्रहांशकवशाद्यान्यः पापग्रहांशकमवस्थितस्यधाम्यं सौम्यग्रहांशकसमव- ५
स्थितस्याधाम्यमिति परांशकस्थस्तुकरोतिजीवमिति यः कश्चित्ग्रहः परनवांशकस्थोन्य
ग्रहनवभागावस्थितोविलग्नगतंस्वांशंपश्यति त्रिकोणयोरन्यतमगतंवातदाजीवचिंतांवदेत्
पुरुषादिसरीसृपांतोजीवः तत्रापिग्रहयुक्तनवांशकवशात् द्विपदसरीसृपादिविभागः मिथुनक
न्यातुलाधनुःपूर्वार्द्धकुंभाः देवानराः पक्षिणश्चद्विपदाज्ञेयाः मेषवृषसिंहधन्विपरार्द्धाश्चतुष्प
दाः कर्कवृश्चिकमकरमीनाः सरीसृपाः तत्रमीनोह्यपदः अन्येतुबहुपदाः मूलंपरांशोपगतः
परांशमिति यः कश्चिद्ग्रहः परांशोपगतोन्यग्रहनवांशकेसमवस्थितोविलग्नगतंपरनवांशकंत्रि

परांशकस्थश्चकरोतिजीवंमूलंपरांशोपगतः परांशम् ६

कोणयोरन्यतमगतंवापश्यति तदामूलंकरोति मूलचिंतांप्रवदेत् एतद्यतः प्रायः संभवतितद्ग्र
हदर्शनात्ज्ञेयम् वृक्षादितृणांतंमूलं तत्रापिग्रहयुक्तनवांशकवशात्स्थलजलत्वंज्ञेयम् कर्कमक
रमीनाः जलजाः अन्येतुसर्वेस्थलजाइति तथाचचिंतासिद्धिंप्रश्नज्ञानमुक्तं स्वांशोस्थितोविलग्नेय
दाग्रहः स्वांशकंनिरीक्षेत धातोस्तदातुचिंतांकरोतिपरसंस्थितोजीवं परभागसन्निविष्टः परांशकं

प्राग्विलग्नमायातम् पश्यतिमूलंप्रवदेदेवंनवपंचमेज्ञेयम् ६ एतदेवपुनरपिप्रकारांतरेणाह धातुमिति मेषमिथुनसिंहतुलाधनुःकुंभाः ओजराशयः वृषकर्ककन्यावृश्चिकमकरमीनायुग्मराशयः तत्रओजेविषमेराशौलग्नगतेप्रथमनवांशकोदयेधातुंप्रवदेत् द्वितीयेमूलं तृतीयेजीवं पुनरपिचतुर्थेधातुं पंचमेमूलं षष्ठेजीवं पुनःसप्तमे धातुं अष्टमेमूलं नवमेजीवमिति युग्मे-

धातुंमूलंजीवमित्योजराशौयुग्मेविंद्यादेतदेवप्रतीपम्

विंद्यादेतदेवप्रतीपम् युग्मे युग्मराशौ लग्नगतेनवांशकक्रमेणैतदेवपूर्वोक्तंप्रतीपंविपर्ययेणविंद्यात् जानीयात् तेनप्रथमनवांशकोदयेजीवं द्वितीयेमूलं तृतीयेधातुं पुनश्चतुर्थेजीवं पंचमे मूलं षष्ठेधातुं पुनःसप्तमेजीवं अष्टमेमूलम् नवमेधातुमिति एवमनेनप्रकारेण क्रमात्परिपाट्या लग्नेविलग्नेयोंशोयोनवमभागः तत्कालमुदितः सयाव द्रूण्योग ६

णनीयः अत्रचलग्ननवांशकवशात्प्राग्वद्योनिविभागः केचित् द्रेष्काणत्रितये यथासंख्यं धातुं मूलंजीवमित्योजराशौयुग्मेविंद्या देतदेवप्रतीप मितिवर्णयंति तच्चायुक्तम् यस्मात् पुरस्तादाचार्यएववक्ष्यति अंशकात्ज्ञायतेद्रव्यमिति अयंसंक्षेपः समासउक्तः विस्त

लग्नेयोंशस्तत्क्रमाद्गूण्यएवसंक्षेपोयंविस्तरात्तत्प्रभेदः ७
इतिवराहमिहिरात्मजपृथुयशोविरचितायांषट्पंचाशिका
यांहोराध्यायःप्रथमः १ ५ ५

रात्व्यासेनास्यैवार्थस्यप्रभेदःस्पष्टताअभिधीयतइति ७ इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकायांहोराविवृतौसंक्षेपात् होराध्यायःप्रथमः १ ५ ५

अथातोगमागमाध्यायोव्याख्यायते तत्रादावेवस्थानगमागमजीवितमरणरोगशांतिपरा
भिभवज्ञानमाह वृषसिंहेति वृषसिंहवृश्चिकाःप्रसिद्धाः घटः कुंभः एतेस्थिरराशयः एतैर्वृष
सिंहवृश्चिकघटैः एतेषामन्यतमे लग्नंप्राप्तेस्थानंविद्धि जानीहि प्रष्टुःस्थानलाभोभवति
गमागमौनस्तः गमश्चआगमश्चगमागमौतौनस्तः नभवतः नमृतं मृतंमरणंनभवति जीव

वृषसिंहवृश्चिकघटैर्विद्धिस्थानंगमागमौनस्तः
नमृतंनचापिनष्टंनरोगशांतिर्नचाभिभवः १

त्येव नचापिनष्टं धात्वादिद्रव्यंधनम् अदर्शनपथिस्थितंननष्टंननाशंप्राप्तम् अथवा
विदेशस्थोनरस्तस्मात्स्थानात् ननष्टः अन्यदेशं नगतः नरोगशांतिः रोगोज्वरादिः
तस्यशांतिः शमनंव्याध्यभिभूतस्यनभवति नचाभिभवः अभिभवःपराजयःसः ७
शत्रोःसकाशात्नभवति १ ५ ५ ५

तद्विपरीतंतुचरैरिति चराः मेषकर्कटतुलमकराः तदिस्मनेनानंतरोक्तं विद्धिस्थानमित्यादि-
कंसर्वंप्रत्यवमृश्यते चरैः चराभिधानैः पृच्छालग्नस्थैः तत्फलमनंतरोक्तं विपरीतंविपर्ययाद्भ
वति पूर्वमुक्तंविद्धिस्थानमिति तत्रचरैःस्थानप्राप्तिर्नास्तीतिवाच्या गमागमौनस्तइतिपूर्व
मुक्तं चरैर्गमागमौविद्येते पूर्वमुक्तंनमृतः चरैर्मृतइतिवक्तव्यम् पूर्वमुक्तंनचापिनष्टं चरै

तद्विपरीतंतुचरैर्द्विशरीरैर्मिश्रितंफलंभवति

र्नष्टमितिवाच्यम् पूर्वमुक्तंनरोगशांतिः चरैः रोगशांतिर्भवतीतिवाच्यम् पूर्वमुक्तं नचा
भिभवः चरैरभिभवोभवतीतिवक्तव्यम् द्विशरीरैर्मिश्रितंफलंभवतिइति द्विशरीराः
द्विस्वभावाःमिथुनकन्याधन्विमीनाः तैःपृच्छालग्नेमिश्रितंफलंभवति यत्स्थिरैरुक्तम्
यच्चरैरुक्तं तन्मिश्रितमुभयंफलंभवति भवतिनभवतीतिवासर्वमेतद्यथोद्दिष्टम् तत्र

अयंनिश्चयः द्विस्वभावलग्नेप्रथमेर्द्धेस्थिरवत् फलंसर्ववदेत् द्वितीयेर्द्धेचरवत् यतस्तस्यप्र
थमार्द्धंस्थिरसमीपवर्त्तिद्वितीयंचरसमीपवर्त्तीति तथाचास्मदीयेप्रश्नज्ञाने स्थिररा
शौलग्नगतेस्थानप्राप्तिंवदेन्नचागमनम् रोगोपशमोनाशोद्रव्याणांस्थासराभवोनात्र
चरराशौविपरीतंमिश्रंवान्त्यंद्विमूर्त्युदये स्थिरवत्प्रथमेर्द्धेस्याद्परेचरराशिवत्सर्वमि-

लग्नेंद्वोर्वक्तव्यंशुभदृष्ट्याशोभनमतोन्यत् २

ति लग्नेंद्वोर्वक्तव्यमिति लग्नंप्रश्नलग्नं इंदुश्चंद्रः तयोर्लग्नेंद्वोर्द्वयोरपिशुभदृष्ट्यासौ-
म्यग्रहदर्शनेनशोभनंफलंवक्तव्यम् देहमनोरूपत्वात् लग्नेंदूसौम्यदृष्टौसंपत्करौभवतः
अतोन्यदिति अतोस्मादुक्ताद्विपरीतेन्यदशुभंवक्तव्यम् तेनलग्नेंदूपापदृष्टौयदिभवतस्त ८
दासर्वपृच्छास्वशोभनंफलंवक्तव्यम् अर्थादेकैकस्मिन्नुभयदृष्टेमध्यमंफलंभवति २ ७

अधुनाशत्रोर्मार्गान्निवृत्तिज्ञानमाह स्कृतशत्रुगतैरिति स्कृतश्चशत्रुश्चस्कृतशत्रू अनयोर्ग
तैः सुतस्थानंपंचमं रिपुस्थानंषष्ठं अनयोर्द्वयोरपिस्थानयोः एकस्मिन्वापापैः सूर्यभौमश-
निभिः प्रश्नलग्नाद्गतैःसमवस्थितैः प्रष्टुःशत्रुःरिपुर्मार्गात्पथःनिवर्त्तनेगच्छति तैरेवपापैः
लग्नाच्चतुर्थस्थानेसमवस्थितैःअपिशब्दःसंभावनायां प्राप्तोपिशत्रुर्निकटस्थोभग्नःपराजितो

स्कृतशत्रुगतैःपापैःशत्रुर्मार्गान्निवर्त्तते चतुर्थगैरपिप्राप्तःशत्रुर्भग्नोनिव
र्त्तते ३ झषालिकुंभकर्कटारसातलेयदास्थिताः रिपोःपराजयस्तदाचतु
ष्पदैःपलायनम् ४

निवर्त्ततेप्रतीपंगच्छतीत्यर्थः ३ अथान्ययोगांतरमाह झषेति
झषोमीनःअलिर्वृश्चिकःकुंभकर्कटौप्रसिद्धौ एतेरसातलेलग्नाच्चतुर्थस्थानेस्थिताएतेषामन्य
तमःप्रश्नलग्नाच्चतुर्थस्थानेयदासमवस्थितोभवतितदारिपोःशत्रोःपराजयोऽभिभवोभवति
चतुष्पदैःपलायनमिति मेषवृषसिंहधन्विपरार्द्धाश्चतुष्पदाः एतेषामन्यतमेलग्नाच्चतुर्थस्थेशत्रोःपला
यनमपसर्पणंभवतीत्यर्थः ४

अथयायिनांप्रतिशुभाशुभमाह चरोदयइति चरोदयेचरराश्युद्गमेतस्मिंश्चशुभग्रहाणांबु
धजीवशुक्राणांअन्यतमस्थितश्चेत् यायिनांगच्छतांशुभंश्रेयःकरोतिविदधाति तस्मिन्नेव
चरोदये अशोभनैःस्थितैःपापग्रहाणांरविभौमार्कजानामन्यतमेस्थितेतेषामेवयायिना
मशोभनमश्रेयःकरोति स्थिरोदयेपिवाशुभम् स्थिरराणामन्यतमस्योदयेपापसंयुक्ते

चरोदयेशुभःस्थितःशुभंकरोतियायिनाम्
अशोभनैरशोभनंस्थिरोदयेपिवाशुभम् ५

विकल्पेनशुभंभवति तत्स्थानंपापग्रहस्यस्वक्षेत्रं उच्चमूलत्रिकोणंमित्रक्षेत्रंवाभवति तदा
शुभमन्यथानशुभमित्यर्थः केचित्स्थिरेष्टमेपिवाशुभमितिपठंति स्थिरराशौलग्नाष्ट ९
पापसंयुक्तेवाशुभंप्राग्वदिति ५ ॥

अथशत्रोःगमागमज्ञानमाह स्थिरेशशीति स्थिरेस्थिरराशौशशीचंद्रोभवति चरो
दयेचरराशौलग्नगतेप्रश्नलग्नगते प्रश्नकालेयदारिपोःशत्रोर्नचागमः आगमोनविद्यते
तदातस्मिन्नेवप्रश्नेरिपोरागममागमनंवदेत्ब्रूयात् विपर्ययेविपर्ययमिति अस्मादेवपूर्वो
क्ताद्विपर्ययं अन्यथात्वेविपर्ययंविपरीतमेववक्तव्यम् एतदुक्तंभवति चरेशशिनिस्थिरराशौ

स्थिरेशशीचरोदयेनचागमोरिपोर्यदा तदागमंरिपोर्वदेद्विपर्ययेविपर्ययं६
स्थिरेतुलग्नमागतेद्विरात्मकेतुचंद्रमाःनिवर्त्ततेरिपुस्तदासुदूरमागतोपि
सन् ७

लग्नगतेयदिरिपोरागमनंश्रूयते तदातस्मिन्प्रश्नेनागच्छतीतिवदेत् ६ अ
थशत्रुनिवृत्तिज्ञानमाह स्थिरेत्विति स्थिरराशौलग्नमागते तत्काललग्नमाप्तेद्विरात्मकेद्वि
स्वभावेराशौयदाचंद्रमाशशीभवति तदारिपुःशत्रुःसुदूरमागतोपिसन् स्वस्थानात्सुत
रांदूरमागतोपिनिवर्त्तते प्रतीपंगच्छतीति अपिशब्दःसंभावनायाम् ७

अथान्ययोगांतरमाह चरेशशीति चरेचरराशौशशीचंद्रमाभवति तथालग्नगतः
प्राग्लग्नस्थोद्विदेहोद्विःस्वभावोराशिर्यदातस्मिन्काले पथोमार्गस्यार्द्धमागत्यनिवर्तते
प्रतीपंगच्छति तुशब्दोवधारणे विपर्ययइति विपरीतेशत्रोरागमनंद्विधाद्विप्रकारेण
स्याद्भवेत् एतदुक्तंभवति द्विस्वभावराशिस्थेशशिनि चरराशौलग्नगतेशत्रोरागम

चरेशशीलग्नगतोद्विदेहःपथोर्द्धमागत्यनिवर्त्ततेरि
पुः विपर्ययेचागमनंद्विधास्यात्पराजयःस्यादशुभेक्षि
तेतु ८ नंबलवन्नभवेत् पराजयःस्यादशुभेक्षितेविति तस्मिन्नेवविप-
रीतेयोगेविपरीतेचंद्रलग्नेवाशुभेक्षितेपापग्रहसंदृष्टे शत्रोःसकाशात्प्रष्टुःपराजयो
ऽभिभवःस्याद्भवेत् एतदुक्तंभवति द्विस्वभावराशिस्थितेशशिनिचरराशौलग्नगतेद्व १०
योरपिपापदृष्टयोःशत्रोरागमनंद्विधाभवति समागमश्चपराजयंकरोतीत्यर्थः ८

अन्यदपिगमागममाह अर्केति अर्कः आदित्यः आर्किः सौरिः ज्ञः बुधः सितः शुक्रः एषां-
मध्येएकोपिग्रहोयदाचरोदयेचरराशौलग्नगतेस्थितोभवतितदाशुक्षिप्रमेवयियासोर्गम
नंवदेत्तद्ब्रूयात् रविवर्ज्यमन्येषामेकतमोपियदाचरराशौलग्नगतोभवति सचवक्रगतेःप्रती
पगतिमाश्रितोभवतितदायियासोर्गमनंनेतिवक्तव्यम् यातानगच्छतीत्यर्थः ९ अथयोगांत

अर्कार्किज्ञसितानामेकोपिचरोदयेयदाभवति प्रवदेत्तदाशुगमनं
वक्रगतैर्नेतिवक्तव्यम् ९ स्थिरोदयेजीवशनैश्चरेक्षितेगमागमौनैव
वदेत्तुपृच्छतः रमाह स्थिरोदयइति स्थिरराशौलग्नगतेयस्मिंश्चजीवशनै
श्चरेक्षितेबृहस्पतिसौराभ्यांदृष्टे पृच्छतःप्रष्टुःगमागमौनैववदेत् नब्रूयात् शत्रुगमागमौनैव
भवतइत्यर्थः तस्मिन्नेवजीवशनैश्चरेक्षिते पापाःपापग्रहाः त्रिपंचषष्ठास्तृतीयपंचमष-
ष्ठस्थानस्थाभवंतितदारिपोःशत्रोःसंगमायभवंति प्रष्टुःशत्रुणासहसंयोगोभवतीत्यर्थः-

अस्मिन्नेवपूर्वोक्तयोगेपापाअशुभग्रहाः चतुर्थाश्चतुर्थस्थानस्थास्तस्यैवशत्रोर्विनिवर्त्तनाय प्रतीपगमनायभवंति शत्रुर्विनिवर्त्ततइत्यर्थः १० अथान्यद्रूमनागमनाय योगांतरमाह नागच्छतीति अर्कः आदित्यः चंद्रः शशीतौलग्नाद्यदाचतुर्थभवनस्थौचतुर्थस्थानगतौभ

त्रिपंचषष्ठारिपुसंग्रामायपापाश्चतुर्थाविनिवर्त्तनाय १०
नागच्छतिपरचक्रंयदार्कचंद्रौचतुर्थभवनस्थौ बुध
गुरुशुक्राहिबुकेयदातदाशीघ्रमायाति ११

वतः तदा परचक्रंनागच्छतिनायातिशत्रुसमूहोनायातीत्यर्थः बुधगुरुशुक्राः हिबुकेच- ११
तुर्थस्थानेयदास्थिताभवंतितदापरचक्रं शीघ्रमाशुआयातीत्यर्थः ११ ५ ५

अथयोगांतरमाह मेषधनुरिति एषांमेषधनुःसिंहवृषाणांमध्येयद्येकतमउदयस्थस्तत्काललग्नगतोभवति वाइत्यथवा तात्कालिकात् प्रश्नलग्नाद्धिबुकेचतुर्थस्थाने एषांमध्यादन्यतमोभवति तेचग्रहैः सहिताः समेताः रहितावातदातस्मिन्नेवकाले शत्रुर्निवर्ततेप्रतीपंगच्छतीत्यर्थः १२ अन्यच्छत्रोरनागमनप्रकारमाह स्थिरराशाविति उदयेतत्काललग्नेस्थिरराशौतत्रैवश

मेषधनुःसिंहवृषायद्युदयस्थाभवंतिहिबुकेवा शत्रुर्निवर्त्त
तितदाग्रहसहितावाविमुक्तावा १२ स्थिरराशौयद्युदयेश
निर्गुरुर्वास्थितस्तदाशत्रुःउदयेरविर्गुरुर्वाचरराशौस्यात्तदाग
मनम् १३

निः सौरिः गुरुः जीवोवाभवति तदाशत्रुः रिपुः स्वस्थानात्चलितः तत्रैवतिष्ठति अथवाचरराशौलग्नगते तत्रचरविः गुरुर्वाभवति तदाशत्रोरागमनं आगमः स्याद्भवेत् १३ अथयातुर्निवृत्तिज्ञानार्थंयोगंश्लोकद्वयेनाह ५

ग्रहेति सर्वोत्तमबलोग्रहः लग्नाद्यस्मिन्गृहेयावत्तमेस्थानेस्थितः सर्वेषामुत्तमबलःप्रधा-
नबलोपेतः तत्तुल्यसंख्यांकेः तत्तुल्यातत्समासंख्याप्रमाणंयेषांमासानांतैः यातुःजिगमि
षोःनिवृत्तिंनिवर्त्तनंप्रवासान्निर्दिशेत्वदेत् १४ चरांशस्थइति तस्मिन्सर्वोत्तमबलेग्रहेच

ग्रहःसर्वोत्तमबलोलग्नाद्यस्मिन्गृहेस्थितः।
मासैस्तत्तुल्यसंख्यांकैर्निवृत्तिंयातुरादिशेत् १४
चरांशस्थेग्रहेतस्मिन्कालमेवंविनिर्दिशेत् द्वि
गुणंस्थिरभागस्थेत्रिगुणंद्व्यात्मकांशके १५ ॥

रांशस्थेच्चरराशिनवभागस्थेपूर्वोक्तकालमेवंविनिर्दिशेत् तत्तुल्यसंख्यांकैर्मासैःस्थिरभागां १२
शकस्थेस्थिरनवांशस्थेतमेवकालंद्विगुणंद्व्यात्मकांशकेद्विस्वभावनवांशकेतमेवकालंत्रिगुणंवदे
त् १५

अत्रैवमतांतरमाह यातुरिति विलग्नंपृच्छालग्नंतस्माज्जामित्रभवनंसप्तमस्थानं तस्याधिप
तिःस्वामी सयदायस्मिन्कालेवक्रंविपरीतंगमनंकरोति तंकालंयातुर्जिगमिषोरावृत्तेरावर्त्तन
स्यप्रवासान्निवृत्तिःभवति अपरेआचार्याःकृष्णाद योब्रुवतेकथयंति वक्रंचग्रहाणांयथासंभ
वंयोज्यं तथाच यातुःपृच्छालग्नात्सप्तमभवनाधिपोयदावक्रीभवति तदावक्तव्यंप्रवासनिवृत्तये

यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा करोतिवक्रमावृत्तेः
कालंतंब्रुवतेपरे १६ उदयर्क्षाच्चंद्रर्क्षंभवतिच यावद्दिनानि
तावद्भिः आगमनंस्याच्छत्रोर्यदिमध्येनग्रहःकश्चित् १७

कालः १६ अथशत्रोरागमनेदिनप्रमाणमाह उदयेति उदयर्क्षमुदयलग्नं चंद्रर्क्षंचंद्रराशिःपृच्छाकाले
यत्रचंद्रमाःस्थितस्तस्मादुदयर्क्षाच्चंद्रर्क्षंयावत्संख्यंभवति तावत्संख्यैर्दिनैःशत्रोःआगमनंस्यात् यदि
मध्यइति तयोर्लग्नचंद्रयोर्मध्येंतरेयदिकश्चिद्ग्रहो नभवतितदेवंग्रहसंभवेशत्रुरवश्यमेवनयातीत्य
र्थः १७

इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकाविवृतौगमागमाध्यायोद्वितीयः २ अथजयपराजया
ध्यायोव्याख्यायते तत्रादावेवजयपराजयज्ञानमाह दशमोदयेति उदयेलग्नेदशमसप्तमेप्रसि
द्धे एतेषुस्थानेषुलग्नात्सौम्याः शुभग्रहाःगताःसमवस्थिताःपृच्छालग्नेननगराधिपस्यपुरस्वामि
नोराज्ञो विजयकराः विशेषेणजयंकुर्वंति आरोभौमः आर्किःसौरिः एतौप्रश्नलग्नात् नव

दशमोदयसप्तमगाःसौम्यानगराधिपस्यविजय
कराःआरार्किज्ञगुरुसिताःप्रभंगदाविजयदानवमे १

मेस्थानेस्थितौप्रष्टुःप्रभंगदौप्रकर्षेणभंगंपलायनंददतः तथाज्ञोबुधःगुरुःजीवःसितः
शुक्रः एतेलग्नान्नवमेस्थानेस्थिताःविजयदाःविशेषेणजयदाभवंति प्रष्टुःसंग्रामेवि
जयोभवतीत्यर्थः १ अथनगरयायिनःकस्यविजयोभवतीत्येतत्परिज्ञानंआह ॥

पौरास्तृतीयेति पुरेभवाःपौराःनागराः पृच्छालग्नात्तृतीयभवनप्रभृतियद्राशिषट्कं अष्टमं
स्थानंयावत् तावन्नागराज्ञेयाः एतद्राशिषट्कंपौराणांशुभाशुभलेज्ञेयमित्यर्थः धर्माद्याया
यिनः धर्मान्नवमस्थानात्प्रभृतिराशिषट्कं द्वितीयंस्थानंयावत् तावत्स्थिताज्ञेयाः एतद्राशि
षट्कंयायिनांशुभाशुभलेज्ञेयाइत्यर्थः येनादौयात्रासुयोगःकृतःसयायिनःपश्चात्कृतःसना
गरःवाशब्दोत्रचार्थेज्ञेयःशुभैःशुभदाःएतेयथाविभागकल्पिताराशयोयस्यशुभैःसौम्यग्रहैः

पौरास्तृतीयभवनाद्धर्माद्यायायिनःशुभैःशुभदाः

संयुक्ताभवंति तस्यशुभदाभवंतीत्यर्थः अर्थाद्यस्यपापैःसंयुक्ताःतस्यपराजयदाः तथाचप्र
श्ने धर्माद्येश्चक्रदलेर्यायिनोनागरास्तृतीयादौ विजयःसौम्ययुतेस्यात् नरभागेक्रूरसंयुतेभंगः
तथाचास्मदीयेप्रश्नज्ञाने नवमाद्येचक्रदलेविज्ञेयोयायिनस्तृतीयादौ पौराःशुभसंदृष्टाभा-
गेविजयःपुरेभंगइति अर्थाद्विभागद्वयेपिपापसौम्यैर्युक्तेव्यामिश्रंफलंभवति नजयोनपराज

यइति व्ययदशमायेपापाइति व्ययंद्वादशंदशमंप्रसिद्धं आयमेकादशं समाहारेएकवद्भावः त्रपापाः पापग्रहाः पृच्छालग्नात्समवस्थिताभवंति तदापुरस्यनगरस्य नेष्टाः नशुभाभवंति यातुः यमुरंतस्यनशुभाः यातुःपुनः शुभकराः उपचयकराइत्यर्थः २ अथसंधिविरोधज्ञानार्थंयोगांतरमाह नृराशीति नृराशयः पुरुषराशयः पुरुषाकृतयोराशयः। नृराशयः मिथुनकुंभतु

व्ययदशमायेपापाः पुरस्यनेष्टाः शुभायातुः २ नृ-
राशिसंस्थाह्युदयेशुभाःस्युर्व्ययायसंस्थाश्चयदाभवंति

लाकन्याः तथात्रआचार्यएवज्ञापकः तुलाथकन्यामिथुनोघटश्चनृराशयइति शुभाः सौम्यग्रहाः बुधशुक्रबृहस्पतयः एतेउदयेपृच्छालग्नेस्थिताःस्युः भवेयुः अथवातएवसौम्यग्रहाः नृराशिसंस्थाव्ययायसंस्थाश्चभवंति व्ययंद्वादशं आयमेकादशं चशब्दःसमुच्चये अनयोरपिसंस्थाःसमवस्थितायदाभवंति तदाआशुक्षिप्रमेवनृपाणांसंधिः संधानंप्रवदेत्ब्रूयात् १५

पापैरिति पापारविभौमशनिक्षीणचंद्राः द्विदेहाः द्विस्वभावराशयः पापैरशुभग्रहैर्द्विदेहोपगतैर्द्विस्वभावराशिषुसमवस्थितैर्नृपाणांएवंविरोधंविग्रहंप्रवदेत् ३ योगांतरमाह केंद्रोपगताइति केंद्राणिलग्नचतुर्थसप्तमदशमानि तेषूपगताःसमवस्थिताः सौम्यैःशुभग्रहैः

तदाशुसंधिंप्रवदेन्नृपाणांपापैर्द्विदेहोपगतैर्विरोधम्
३ केंद्रोपगताःसौम्याःसौम्यैर्दृष्टानृलग्नगाःप्रीतिं
कुर्वंतिपापदृष्टाःपापास्तेष्वेवविपरीतम् ४ ॥

अथवातएवसौम्याः नृलग्नगाः नृराशिषुप्रागुक्तेषु स्थिताः सौम्यैःशुभग्रहैश्चदृष्टाः परस्परमवलोकयंतीत्यर्थः एवंविधाःप्रीतिंसंधिंकुर्वंति निवृत्तिंप्रापयंति तेषुकेंद्रेषुसमवस्थिताःपापाः तेचपापदृष्टाःपरस्परंपापैरवलोकिताः विपरीतंविपर्ययं अप्रीतिंविग्रहंकुर्वंति ४

षं·पं· अथसेनागमनज्ञानमाह द्वितीयेति प्रश्नलग्नाद्यदा द्वितीयेवा यथातथागुरुशुक्रौ जावसितौभ ज·द·
१५ वत: तदा-वश्यं सेना आश्वेवागच्छति क्षिप्रमेवायाति प्रवासी अन्यदेशस्थ: आश्वेवागच्छति नसं ३.
शय: निर्विकल्पंयथास्यात्तथा ग्रहाणांक्रमविवक्षार्थम् कदाचिद्द्वावेवद्वितीयेवा द्वावेवतृतीयेवा
एकोद्वितीयेपातृतीयेप्येकएवेति ५ इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकाविवृतौज

द्वितीयेवातृतीयेवागुरुशुक्रौयदातदा आश्वे
वागच्छतेसेनाप्रवासीचनसंशय: ५ इतितृ·अ·
केंद्रत्रिकोणेषुशुभस्थितेषुपापेषुकेंद्राष्टमवर्जितेषु

यपराजयाध्याय:तृतीय: ३ अधुनाशुभाशुभलक्षणाध्यायोव्याख्यायते तत्रादावेवप्रष्टु:शु
भाशुभज्ञानमाह केंद्रेति केंद्राणि लग्न१चतुर्थ४सप्तम ७ दशमानि१० त्रिकोणसंज्ञेनवमपं १५
चमे शुभा:सौम्यग्रहा:एतेषुत्रिकोणेषुशुभस्थितेषुशुभा:स्थितायेषुसौम्यग्रहयुक्तेष्वित्यर्थ:

शुभान्वितेष्वितिपाठ: तथापापेषुपापग्रहेषुकेंद्राष्टमस्थानंवर्जयित्वा अन्यत्रसमवस्थितेषु-
सत्सुनराणांमनुष्याणांसर्वार्थसिद्धिंवदेत् सर्वेषांनि:शेषाणामर्थानांसिद्धिंसाधनंवदेद्ब्रूया
त् विपर्ययइति एषुपापसौम्येषु विपर्ययेविपरीते अन्यथास्थितेषु विपर्ययोवैपरीत्यमेव-
स्याद्भवेत् एतदुक्तंभवति यदापापा:केंद्रत्रिकोणाष्टमेषुभवंति सौम्या:केंद्रत्रिकोणाष्टमवर्ज्य

सर्वार्थसिद्धिंप्रवदेन्नराणांविपर्ययस्थेषुविपर्यय:स्या
त् १ त्रिपंचलाभास्तमयेषुसौम्यालाभप्रदानेष्टफला
श्चपापा:तुलाथकन्यामिथुनंघटश्चनृराशयस्तेषुशुभंवदंति२

मन्यत्रभवंतितदासर्वार्थानामसिद्धिंप्रवदेत् १ अधुनालाभालाभज्ञानमाह त्रिपंचेति तृतीयपं
चमेस्थानेप्रसिद्धे लाभएकादशं अस्तमयंसप्तमं एतेषुसौम्या:शुभग्रहा:प्रष्टुर्लाभप्रदा: एवे
वत्रिपंचलाभास्तमयेषु पापा अशुभग्रहा: नेष्टफला:अनिष्टमशोभनंफलंकुर्वंति अर्थनाशं-

समारभंतीत्यर्थः तुलेति तुलकन्यामिथुनाः प्रसिद्धाः घटः कुंभः एतेनरराशयः पुंराशयः एतेषुल ग्नेषु सौम्यग्रहाधिष्ठितेषु शुभंभद्रं मुनयोवदंति कथयंतीत्यर्थः २ अन्ययोगांतरमाह स्थानप्र दाइति सौम्याः शुभग्रहाः लग्नाद्दशमेसप्तमेचस्थानेगताः समवस्थिताः प्रष्टुः स्थानप्रदाः स्युः स्वशब्देन धनमुच्यते सुतलग्नेप्रसिद्धेतेषुस्थिताः सौम्याः मानार्थदाः स्युर्भवेयुः पापाव्ययेति

स्थानप्रदादशमसप्तमगाश्चसौम्यामानार्थदाः स्वसुतलग्नगताभवं
ति पापाव्ययायसहितानशुभप्रदास्युर्लग्नेशशीनशुभदोदशमेशुभश्च ३

पापा अशुभग्रहाः व्ययोद्वादशं आयएकादशम् तयोर्द्वयोः सहिताः नशुभप्रदाः स्युः भवेयुः नशुभफलंप्रयच्छंति लग्नइति पापाइत्यनुवर्त्तते शशीचंद्रः पापोलग्नेस्थितोनशुभइति शुभंफलंनददाति दशमेस्थानेसमवस्थितः पापरूपोपि शुभफलोभवति श्रेयस्करोभव तीत्यर्थः ३

अन्यच्चशुभाशुभज्ञानमाह इंद्विति द्विशब्देनद्वितीयंस्थानमुच्यते सप्तमदशमेप्रसिद्धे आयएका दशं रिपुस्थानंषष्ठं त्रिशब्देनतृतीयंस्थानमुच्यते एतेषुद्वितीयतृतीयसप्तमदशमायरिपुत्रिषुसं- स्थितः तमिंदुंचंद्रंगुरुर्जीवः पश्येत्तदाप्रष्टुः शुभफलंलाभादिकंप्रमदादिकंस्त्रीहेतुकंस्याद्भवेत् ल ग्नत्रिधर्मेति लग्नंपृच्छालग्नं तृशब्देनतृतीयस्थानं धर्मस्थानंनवमं सुतस्थानंपंचमं नैधन

इंदुंद्विसप्तदशमायरिपुत्रिसंस्थंपश्येद्गुरुः शुभफलंप्रमदाकृतंस्यात्
लग्नत्रिधर्मसुतनैधनगाश्चपापाकार्यार्थनाशभयदाशुभदाशुभाश्च ४

मष्टमं एतेषुस्थानेषुपापाः पापग्रहागताः समवस्थिताः प्रष्टुः कार्यार्थनाशभयदाः कार्यस्यकृत्यस्यअ र्थस्यधनस्यनाशंविघातंभयंभीतिंददतीत्यर्थः शुभदाशुभाश्चेति एष्वेवलग्नादिषुस्थानेषुशुभाः सौम्यग्रहाः समवस्थिताः शुभदाः शुभफलप्रदाइत्यर्थः ४

अधुनारोगार्त्तस्य शुभाशुभज्ञानमाह शुभेति शुभग्रहाबुधगुरुशुक्राः विलग्नंपृच्छाल
ग्नं सप्तमाष्टमपंचमस्थानानिप्रसिद्धानि एतेषुयथासंभवंशुभग्रहाःसमवस्थितास्तेचनि
रीक्षिताःसौम्यैःशुभग्रहैरेवदृष्टाः एतदुक्तंभवति शुभग्रहदृष्टस्थानस्थाःपरस्परंपश्यंतिय
दा तदाएषयोगोनकेवलंयावन्निशाकरश्चंद्रमास्त्रिषड्दशायेचस्याद्भवेत् तृतीयषष्ठद-

शुभग्रहाःसौम्यनिरीक्षिताश्चविलग्नसप्ताष्टमपंचमस्थाः
त्रिषड्दशायेचनिशाकरःस्याच्छुभंवदेद्रोगनिपीडितानाम् ५
इतिवराहमिहिरात्मजपृथुयशोविरचि०षट्पंचाशि०च० ४

शमानिप्रसिद्धानि आयमेकादशमेतेषामन्यतमेचंद्रमाभवतितदारोगनिपीडितानांव्याधिगृही
तानांशुभमारोग्यंवदेद्ब्रूयात् अर्थादेवयोगासंभवेसत्यशुभंवदेदितियोगेसतिशुभंब्रूयात् ५ १७
इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकाविवृतौशुभाशुभाध्यायश्चतुर्थःसमाप्तः ४ ॥

अधुनाप्रवासचिंताध्यायोव्याख्यायते तत्रादावेवागमनार्थंयोगमाह दूरगतस्येति कृत-
स्थानंपंचमं धनस्थानंद्वितीयं सहजस्थानंतृतीयं एतेषुस्थानेषु लग्नात्तात्कालिकात् ग्रहैररा-
दित्यादिभिःसर्वैःसमवस्थितैः दूरगतस्यविप्रकृष्टस्थितस्य आगमनंसंप्राप्तिंवदेत् सौम्यैर्नष्ट
प्राप्तिमिति सौम्यैःसौम्यग्रहैः बुधगुरुसिताक्षीणचंद्रैः तेष्वेवस्थानेषुव्यवस्थितैःनष्टस्याप

अथप्रवासचिंताध्यायः दूरगतस्यागमनंकृतधनसहजस्थितैर्ग्रहै
र्लग्नात् सौम्यैर्नष्टप्राप्तिंलब्धागमनंगुरुसिताभ्याम् १ ॥

हृतस्यवस्तुनःप्राप्तिंलाभंवदेत् तस्यैवप्रवासोनष्टमासीत् सएववाप्रवासीनष्टोदर्शनंगतःतद्द
र्शनंभवतीत्यर्थः लब्धागमनं गुरुसिताभ्यामिति गुरुर्बृहस्पतिःसितःशुक्रः आभ्यामेषेवस्था
नेषुसमवस्थिताभ्यांलब्धागमनं लघुनाल्पेनैवकालेनप्रवासिनामागमनंप्रवदेत् १ ७

अथयोगांतरमाह जामित्रइति जामित्रंसप्तमंसप्तमेस्थाने अथषष्ठेवा पृच्छालग्नाद्यःसमव स्थितः तथाचतुर्णांकेंद्राणांचमध्यादन्यतमे केंद्रेवाक्पतिर्भवतितदा प्रोषितस्यप्रवासितस्याग मनंप्राप्तिंविंद्याज्ज्ञानीयात् त्रिकोणइति त्रिकोणेनवपंचमेज्ञोबुधः सितःशुक्रः बुधेशुक्रेवा त्रिकोणयोर्नवमपंचमस्थानयोरेवान्यतमस्थेद्वयोर्वात्रिकोणस्थयोः प्रोषितागमनंविंद्यादिति २

जामित्रेत्वथवाषष्ठेग्रहः केंद्रेथवाक्पतिः प्रोषितागमनंविंद्यात्रिको
णेज्ञेसितेपिवा २ अष्टमस्थेनिशानाथेकंटकैःपापवर्जितैः प्र
वासीसुखमायातिसौम्यैर्लाभसमन्वितः ३

अथयोगांतरमाह अष्टमस्थइति निशानाथश्चंद्रमास्तस्मिन्प्रश्नलग्नादष्टमस्थे अष्टमस्थानंसमवस्थितेकंटकानिकें द्राणि लग्नचतुर्थसप्तमदशमानि तैःपापवर्जितैः अशुभग्रहवर्जितैःप्रवासीपथिकः सुखेना १८
क्लेशेनायाति आगच्छतिसौम्यैःशुभग्रहैःकेंद्रस्थैःप्रवासीलाभसमन्वितःलाभयुतःसुखमाया ति ।३

अन्ययोगांतरमाह पृष्ठोदयेति पृष्ठोदयाः मेषकर्कटधन्विमकरमीनाः पृष्ठोदये पृच्छालग्नेएतेषा मन्यतमे तस्मिंश्चपापनिरीक्षिते अशुभग्रहावलोकितेवाशब्दोत्रचार्थे एवंविधेयोगेप्रवासिनोवध स्ताडनंबंधोबंधनंभवेत् अथवापापा अशुभग्रहाः लग्नात्तृतीयस्थानेस्थिताःसर्वएतेचसौम्यैः

पृष्ठोदयेपापनिरीक्षितेवापापास्तृतीयेरिपुकेंद्रगेवा सौ
म्यैरदृष्टावधबंधदाःस्युर्नष्टाविनष्टामुषिताश्चवाच्याः ४

शुभग्रहैरदृष्टा अनवलोकितास्तदाप्रवासिनोनष्टास्तस्मात्स्थानादन्यदेशंगताः अथवापापाल-
ग्नाद्रिपुस्थानेवागतास्तेचसौम्यैरदृष्टास्तदाप्रवासिनोमुषिताश्चोरैर्वापहृताःस्युर्भवेयुः वाश-
ब्दोयोगानांविकल्पार्थः वधबंधदाःस्युरितिपापानांविशेषणम् ४ ५ ५ ५

अधुनाप्रवासिनामागमनकालज्ञानमाह ग्रहोविलग्नादिति विलग्नात्पृच्छालग्नाद्यतमेयाव
त्संख्येराशौयःकश्चिद्ग्रहःस्थितःसचस्पष्टगतिस्तिष्ठेत्तेनतत्प्रमाणेनद्वादशराशयःआहतागु-
णिताःकार्याःएतदुक्तंभवति द्वादशसंख्यमंकंस्थाप्यलग्नात्प्रभृतिग्रहांतरराशिसंख्यया
गुणयेत् तत्रयावत्संख्याभवंति तावत्संख्यानिदिनानि प्रवासिनःआगमनस्यविद्याज्ज्ञा-

ग्रहोविलग्नाद्यतमेगृहेतुतेनाहताद्वादशराशयःस्युः
तावद्दिनान्यागमनस्यविद्यान्निवर्त्तनंवक्रगतेग्रहेस्तु ५

नीयात् तावद्भिःदिनैःपथिकआगच्छतीत्यर्थः निवर्त्तनंवक्रगतैरिति अथसग्रहोवक्रगतिःप्र
तीपगतिस्तदातावत्संख्यैर्दिनैःप्रवासिनःप्रवासान्निवर्त्तनंभवति ५ इतिश्रीभट्टोत्प
लविरचितायांषट्पंचाशिकाविवृत्तौप्रवासचिंताध्यायःपंचमःसमाप्तः ५ ७ ॥ १९

अथनष्टप्राप्त्यध्यायोव्याख्यायते तत्रादावेवचौरज्ञानमाह स्थिरोदयइति स्थिराःवृषसिंहवृश्चि
ककुंभाःएषामन्यतमस्योदये तत्काललग्नतांप्राप्ते अथवायस्यकस्यचिद्राशेरुदयेतत्कालंस्थि
रनवांशकवर्त्तमाने अथवायस्यकस्यचिद्राशेर्वर्गोत्तमनवांशकोदये वर्गोत्तमनवांशाश्चरादि

अथनष्टप्राप्त्यध्यायः स्थिरोदयेस्थिरांशेवावर्गोत्तमगते
पिवा स्थितंतत्रैवतद्द्रव्यंस्वकीयेनैवचोरितम् १ ७

षुप्रथममध्यमपर्यंतगाः इतिवर्गोत्तमनवांशकानांलक्षणंप्रोक्तम् एवंलग्नस्यवर्गोत्तम
गतेनवांशकेवायदपहृतंद्रव्यंधनंतत्स्वकीयेनात्मीयेनैवकेनचिच्चोरितमपहृतं तच्चतत्रैवतस्मिन्ने
वस्थानेस्थितं अन्यथा अपरेणापहृतं तस्मात्तत्स्थानाच्चलितमिति १ ७

अधुनास्थानज्ञानमाह आदिमध्येति द्रेष्काणाः प्रथमपंचमनवाधिपानामितिद्रेष्काणलक्ष
णंप्रागुक्तं आदिद्रेष्काणःप्रथमःमध्येद्वितीयः अवसानेतृतीयःविलग्नंपृच्छालग्नं विलग्नतः
विलग्नात् तात्काललग्नादित्यर्थःभूतेषुद्रेष्काणेषु यथासंख्यंहृतंधनंवित्तं द्वारदेशेतथामध्ये
गृहांतेच धनंस्थितं वदेत् एतदुक्तंभवति लग्नस्यप्रथमद्रेष्काणोदयेहृतंधनंद्वारदेशेस्थितंवदेत्

आदिमध्यावसानेषुद्रेष्काणेषुविलग्नतः द्वारदेशेतथामध्येगृहांतेचवदेद्ध
नम् २ पूर्णःशशीलग्नगतःशुभोवाशीर्षोदयेसौम्यनिरीक्षितश्च ॥

द्वितीयेद्रेष्काणोदयेगृहमध्येब्रह्मस्थानसमीपे तृतीयेद्रेष्काणोदयेगृहांते वेश्मपश्चिमभागे वदेद्गृ
यादिति २ अधुनालाभालाभज्ञानमाह पूर्णःशशीति पूर्णःपरिपूर्णमंडलःशशी चंद्रःसच
लग्नगःपृच्छालग्नेसमवस्थितः अथवाशीर्षोदयेलग्नगते तत्रैवशुभःसौम्यग्रहःसमव
स्थितः सचसौम्यैः शुभग्रहैरेवनिरीक्षितोदृष्टः भवति तदाआशुक्षिप्रमेव नष्टस्याप

हृतस्यधनादेर्लाभंप्राप्तिंकुरुतेविधत्ते लाभइति अथवालग्नात् लाभेचैकादशेस्थानेशुभः
सौम्यग्रहःबलवान्वीर्यवानुपयातःप्राप्तोभवति तथापिचशब्दान्नष्टस्याशुलाभंकुरुते
अर्थादेवोक्तयोगानामभावेहृतंनलभ्यतइति ३ अधुनादिगध्वनोःप्रमाणमाह दिग्वा-
च्येति प्राच्यादीशा रविसितकुजराहुयमेंदुसौम्यवाक्पतयःइतिग्रहाणांदिशउक्ताःतत्रकें

नष्टस्यलाभंकुरुतेतदाशुलाभोपयातोबलवान्शुभ
श्च ३ दिग्वाच्याकेंद्रगतैरसंभवेवावदेद्विलग्नर्क्षात्

द्रगतैर्ग्रहैर्दिगीशावाच्यावक्तव्याः तात्कालिकलग्नस्ययःकश्चिद्ग्रहःकेंद्रेसमवस्थितः तस्ययाः
दिक् तस्यांहृतंवित्तंगतंवदेत् तद्यथा सूर्येलग्नचतुर्थसप्तमदशमानामन्यतमस्थानस्थे पूर्व
स्यामेव आग्नेय्यांशुक्रे भौमेदक्षिणस्यांराहौनैर्ऋत्यांसौरेपश्चिमायांचंद्रेवायव्यांबुधेउत्तर
स्यां जीवेईशान्यामिति द्वयोर्बहुषुवा केंद्रगतेष्वधिकबलादसंभवेवावदेद्विलग्नर्क्षात् अज

वृषमिथुनकुलीराः पंचमनवमैः सहैंद्राद्याइतिराशीनांदिशाउक्ताः असत्यविद्यमानेकेंद्रेग्रहे
र्विलग्नर्क्षात् विलग्नराशितादिशंवदेद्ब्रूयादिति तद्यथा मेषसिंहधनुःषुलग्नेषुहृतंवित्तं पूर्वस्यांदि-
शिगतम् एवंवृषकन्यामकरेषु दक्षिणस्यांमिथुनतुलाकुंभेषु पश्चिमायांवृश्चिककर्कटमीनेषू
त्तरस्यांमध्याच्च्युतेरिति विलग्नंप्रश्नलग्नंतस्यनवांशकानवभागास्तैर्मध्यात्पंचमनवमांशका

मध्याच्च्युतेर्विलग्नान्नवांशकैर्योजनावाच्या ४

च्युतेश्चलितेर्योजनावाच्या एतदुक्तंभवति प्रश्नलग्नेप्रथमनवांशकात्प्रभृति पंचमनवांशकं
यावद्वर्त्तते तावद्धृतंवित्तंतस्मिन्नेवदेशेप्रागुक्तायांदिशिगतंवदेत् पंचमादंशकाद्यावंतोपर
तोंशकाः अतीतास्तावंतियोजनानितद्वित्तंप्रागुक्तायांदिशिगतमिति ४ इतिश्रीभ
ट्टोत्पलविरचितायांषट्पंचाशिकाविवृतौनष्टप्राप्त्यध्यायःषष्ठःसमाप्तः ६ ॥ २१

अथमिश्रिकाध्यायोव्याख्यायते तत्रादावेवगर्भिणीपुत्रदुहितृजन्मज्ञानंवरस्यकन्यालाभज्ञा
नंचाह विषमस्थितेति अर्कपुत्रेशनैश्चरेप्रश्नलग्नाद्विषमस्थानस्थिते तृतीयपंचमसप्तमनवमै
कादशानिविषमस्थानानि एषामन्यतमस्थानस्थेपृष्टुःसुतजन्मप्रादुर्भावंवदेत् नन्वत्रलग्न
स्यकथंविषमस्थानस्यगणनाक्रियते उच्यते अत्राचार्यौवसहमिहिरोज्ञापकः तथाच वि-

अथमिश्रिकाध्यायः विषमस्थितेर्कपुत्रेसुतस्यजन्मा न्यथांगनायाश्च लभ्यावरस्यनारीसमस्थितेतोन्यथावामम् १

हायलग्नंविषमर्क्षसंस्थःसौरोपिपुंजन्मकरोविलग्नात् अथांगनायास्तु अन्यथाअन्यप्रकारे
णास्थितेर्कपुत्रेलग्नादंगनायाःस्त्रियःजन्मवदेत् तेनद्वितीयचतुर्थषष्ठाष्टमदशमद्वादशानांअ
न्यतमेस्थानस्थितेसौरे वरस्यनारीकन्यालभ्येतिवदेत् समवस्थितेलग्नात्समस्थानस्थेचा
मंविपरीतंनलभ्यतइत्यर्थः १ ५ ७ ६ ७

ष.पं. अधुनाविवाहज्ञानमाह गुरुरविसौम्यैरिति गुरुर्जीवोरविःसूर्यःसौम्योबुधःएतैर्दृष्टअवलो मिश्रि.
२२ कितःकीदृशःत्रिसुतमदायारिगःत्रिशब्देनतृतीयस्थानंसुतस्थानंपंचमंमदस्थानंसप्तमंआ ८
यएकादशंअरिस्थानंषष्ठंलग्नादित्येषांस्थानानामन्यतमस्थानेगतःसमवस्थितःशशीचंद्रो
गुरुरविसौम्यैर्दृष्टोयदिभवतितदाप्रष्टुःविवाहस्यपाणिग्रहणस्यकर्त्ताविधाताभवति त्रिकोण

गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदायारिगःशशीलग्नात् भवतिचविवाहक
र्त्तात्रिकोणकेंद्रेषुवासौम्याः२ चंद्रार्कयोःसप्तमगौसितार्कीसुरवेष्टमेवा
पितथाविलग्नात्

केंद्रेष्विति अथवासौम्याःशुभग्रहाःत्रिकोणकेंद्रेषु नवमपंच
मलग्नचतुर्थसप्तमदशमेषुयथासंभवंभवंति तदाप्रष्टुःविवाहोभवतीत्यर्थः वाशब्दोन्य
योगव्यवच्छेदकार्थः२ अधुनावर्षासमयेवृष्टिज्ञानमाह चंद्रार्कयोरिति चंद्रःशशीअर्कः २२
आदित्यःअनयोःसप्तमगौसितार्कौ शुक्रशनीयथासंभवंयदिभवतः अथवाविलग्नादेव

तेनैवप्रकारेणतावेवसितार्कौद्वितीयस्थानेदुश्चिक्येवाभवतस्तयोर्वास्थानयोस्तदा वर्षासुवृष्टिं
वर्षणंवदेत् ३ अधुनाप्रष्टुःप्रश्नकालेवृष्टिज्ञानमाह सौम्याइति कर्कमीनमकरकुंभाःजलराशयः
सौम्याःशुभग्रहाःजलराशिषुस्थिताः सितेपक्षेशुक्लेमासार्द्धे पुनरयंविशेषः तृतीयधनकेंद्रगा
यदिभवंति तृतीयद्वितीयलग्नचतुर्थसप्तमदशमानि एतेषुयथासंभवंगताःवाशब्दोन्ययोगापे

द्वितीयदुश्चिक्यगतौतथाचवर्षासुवृष्टिंप्रवदेन्नराणाम् ३
सौम्याजलराशिस्थास्तृतीयधनकेंद्रगाःसितेपक्षे चं
द्रेवाप्युदयगतेजलराशिस्थेवदेद्वर्षम् ४ पुंवर्गेलग्नगते
पुंग्रहदृष्टेबलान्वितेपुरुषः

क्षायांअथवाउदयगतेचंद्रेतत्रजलराशिस्थेपृच्छा
यांचवर्षासुवृष्टिंप्रवदेत् ४ अथगर्भिणीनांकिंजायतइत्येतज्ज्ञानमाह पुंवर्गेति पुंस्त्रीक्रूराविति
राशीनांपुंस्त्रीसंज्ञाजातकेउक्ताःमेषमिथुनसिंहतुलाधन्विकुंभाःपुंराशयःशेषास्त्रीराशयःवर्ग

लक्षणंप्रागुक्तम् पुंवर्गेपुरुषराशिवर्गे लग्नगतेतत्काललग्नतांप्राप्ते तस्मिन्पुंग्रहदृष्टेनरग्रहा
वलोकिते क्लीबपतीबुधसौरौ चंद्रसितौयोषितां नृणांशेषाइतिग्रहाणांपुंस्त्रीनपुंसकत्वमभि-
हितं तेनपुंग्रहारविभौमजीवाः एतेषामन्यतमेन लग्नगतेदृष्टे तस्मिंश्चतथाभूते लग्नेबला-
न्वितेवीर्ययुक्तेचपुरुषोजायते अधिपयुतोदृष्टोवा बुधजीवनिरीक्षितश्चयोराशिः सभवति

युग्मेस्त्रीग्रहदृष्टेस्त्रीबुधयुक्तेतुगर्भयुता ५

बलवान्यदादृष्टोपिवाशेषैरिति लग्नबलमुक्तं युग्मेस्त्रीग्रहदृष्टेति युग्मेयुग्मराशौस्त्रीसंज्ञके
वृषादौगतेस्त्रीग्रहदृष्टेस्त्रीग्रहौ चंद्रसितौ ताभ्यामन्यतमेनावलोकिते बलयुक्तेच स्त्री कन्याजा
यते सामान्यप्रश्नलग्नेबुधयुतेबुधेनसंयुक्ते स्त्री गर्भयुतासगर्भावर्त्तते अद्यापिनप्रसूयतइत्य
र्थः ५

अथप्रष्टुःकीदृशीस्त्रीपुरुषोवाचेतसिवर्त्ततइत्येतत्परिज्ञानमाह कुमारिकामिति शुक्लप्रतिपत्प्र
भृतिदशम्यंतंयावच्छशीबालः एकादशीप्रभृतिकृष्णपंचमीयावत् युवा षष्ठ्याद्यमावास्यांतंया
वत्वृद्धः तत्रपृच्छालग्नंयदिसबालशशीबालश्चंद्रःपश्यति लग्नेवातथाभूतःस्थितः तदाप्रष्टुः
कुमारिकांवदेत् एवमेवबुधःपश्यति तत्रावस्थितस्तथापिकुमारिकांअर्थाद्वयोवनस्थेचंद्रेयौव

कुमारिकांबालशशीबुधश्चवृद्धांशनिःसूर्यगुरूप्रसूताम् स्त्रींकर्कशांभौ
मसितौविधत्तएवंवयःस्यात्पुरुषेषुचैवम् ६ नोपेतांवृद्धांवृद्धामिति केचिद्बालांकु
मारींचशशीबुधश्चेतिपठंति शशीबालांकरोति आयुष्यंयावत् आयुःषदर्शनंयावदित्यर्थः बालांस्त्रि
यंबुधः कुमारिकामनूढांकरोति एवंशनिःसौरोविगतयौवनांजराभिभूतांकरोति सूर्योऽर्कःगुरुर्बृ
हस्पतिः एतौप्रसूतांप्रसवयुतांस्त्रियंविधत्तःकुरुतः भौमोंगारकः सितःशुक्रः एतौकर्कशामतिदारु
णांस्त्रियंकुरुतः एवमनेनप्रकारेणवयःशरीरावस्थास्याद्भवेत् पुरुषेषुचैवमिति पुरुषेष्वपिपृच्छास

मयेप्रष्टुः वयोज्ञानमेवमनेनप्रकारेणवदेत् ६ अथपृच्छांपृच्छति कस्यसंबंधिनीचिंतामेमनसि
वर्त्ततेइत्येतत्परिज्ञानमाहश्लोकद्वयेन आत्मसममिति ग्रहैरादित्यादिभिःसबलैर्लग्नगतैर्लग्न
स्थैः प्रष्टुः आत्मसमं स्वशरीरतुल्यः कश्चिन्मनसिवर्त्ततइति तत्कार्यंवक्तव्यमित्येवंलग्नात्सह
जस्थितैस्तृतीयगैः भ्राता सुतगैः पंचमस्थानस्थैःसुतःपुत्रः चतुर्थगैश्चतुर्थस्थानस्थैर्माताज

आत्मसमंलग्नगतैर्भ्रातासहजस्थितैस्सुतःसुतगैः
मातावाभगिनीवाचतुर्थगैः शत्रुगैःशत्रुः ७ भा
र्यासप्तमसंस्थैर्नवमेधर्माश्रितोगुरुर्दशमे ॥

ननी भगिनीचेतिवाच्यम् शत्रुगैःषष्ठस्थानस्थैःरिपुचिंता ७ भार्येति लग्नात्सप्तमस्थाना
श्रितैःसबलैर्ग्रहैःपत्नीवाच्या नवमेनवमस्थानस्थैर्धर्माश्रितोधर्मसंयुक्तइतिचिंतावाच्या द
शमेगुरुराचार्यइति स्वांशपतिरित्यादि स्वश्चासावंशश्चस्वांशः आत्मीयोनवभागस्तस्यप- २४

तिःस्वामी पृच्छालग्नेतत्कालंयोनवांशकउदितःतत्पतिर्यदालग्नस्थोभवति तदाप्रष्टुःआत्म
चिंतेतिवाच्यम् अथस्वांशपतिर्मित्रंतत्काललग्नेस्थितं तदामित्रंचिंतितमितिवाच्यम् अथ
स्वांशपतिःशत्रुःरिपुःतत्कालंलग्नेस्थितःतदा शत्रुचिंतागतेतिवाच्यम् अथनिर्दिष्टस्थानेषु
द्वौग्रहौबहवोवाभवंति तदातेषांमध्याद्योबलयुतःसयत्रस्थितःतंप्रष्टुःचित्तेगतंस्थितमि

स्वांशपतिर्मित्रशत्रुषुतथैववाच्यंबलयुतेषु ८

तिवाच्यम् तथैवतेनैवप्रकारेण यथाभिहितेषु बलयुक्तेषु वीर्यवत्सु मध्यात्कार्यंवाच्यम्
शत्रूमंदसितौसमश्चशशिजोमित्राणिशेषारवेरित्यादिनाग्रंथेचजातकेमित्रशत्रुविभागः
प्रदर्शितइति ८ अधुनाप्रवासचिंताज्ञानमाह ७ ७ ७

चरलग्नेति चराणांमेषकर्कटतुलामकराणामन्यतमेलग्नेतत्र तत्कालंचरभागे चरनवां
शकेउदितस्तस्मिंश्चरलग्नेमध्यात्संचमनवांशकात् भ्रष्टेच्युते पश्चादिकमंशंतत्र वर्त्ततइत्य
र्थः पृष्टुःप्रवासचिंतास्याद्भवेत् प्रवासनिमित्तंचिताभवेदित्यर्थः अत्रैवनिश्चयमाह भ्र
ष्टइति सप्तमभवनंपृच्छालग्नात्सप्तमोराशिस्तस्मात् तत्कालंयदिकश्चिद्ग्रहोभ्रष्टःप्र-

चरलग्नेचरभागेमध्याद्भ्रष्टेप्रवासचिंतास्यात्
भ्रष्टःसप्तमभवनात्पुनर्निवृत्तोयदिनवक्री ९

च्युतःचलितःसचभौमादिकस्तदाप्रवासीपुनर्निवृत्तो निवर्त्ततइत्यर्थः प्रवासचिंतान्ने
नकिंतुनयास्यति यदिनवक्रीति योसौसप्तमभवनाद्भ्रष्टःग्रहःसयदिवक्रीप्रतीपगतिर्न
भवति तदानिवृत्तएववाच्यः अथवक्रीतदावृत्तोयास्यतीतिवाच्यम् ९ ७ २५

अथकीदृश्यास्त्रियासहमेसंयोगआसीदित्येतज्ज्ञानमाह अस्तेरविसितवक्रेरिति रवि
रादित्यःसितःशुक्रःवक्रोंगारकः एतेषामन्यतमेपृच्छालग्नादस्तेसप्तमेस्थानेपरजायांप
रपत्नींपरभार्ययासहसंयोगआसीत् एवंगुरोजीवेस्थिते स्वामात्मीयांस्त्रियंइतिप्रवदेत्

अस्तेरविसितवक्रैःपरजायांस्वांगुरौबुधेवेश्याम्
चंद्रेत्ववयःशशिवत्प्रवदेत्सौरेंत्यजातीनाम् १०

बुधेवेश्यांसाधारणस्त्रियंचंद्रेत्वेवंसाधारणस्त्रियमेववदेत् तथातेनैवप्रकारेणसौरेशनैश्चरेस
प्तमेंत्यजातीनांनिकृष्टजातीनांस्त्रियंअगम्यामितिप्रवदेत् वयःशशिवदिति तासांसर्वासां-
स्त्रीणांशशिवच्चंद्रवद्वयःशरीरावस्थांप्रवदेदिति बालचंद्रेबालांयौवनस्थेयौवनोपेतांवृद्धेवृद्धांचं
द्रप्रविभागःप्रागेवदर्शितइति १०

षट्पं
२६

मि०
७

अथरोगार्त्तस्यपरदेशस्थितिज्ञानमाह मंदइति मंदः सौरः सच्चपापसमेतोरविभौमक्षीणचं-
द्राणामन्यतमेनयुक्तस्तथाभूतोलग्नात्पृच्छालग्नान्नवमेस्थानेस्थितस्तत्रचशुभैरयुतदृष्टः तत्रच
शुभग्रहाणामन्यतमेननयुक्तोनाप्यवलोकितस्तदारोगार्त्तः रोगोज्वरादिस्तेनार्त्तः पीडितः परदेशे
ऽन्यस्मिन्ग्रामादौस्थितः तथानेनैवलक्षणेनयुक्तः सौरोलग्नादष्टमेस्थानेगतः समवस्थितस्तदात

मंदः पापसमेतोलग्नान्नवमेशुभैरयुतदृष्टः रोगार्त्तः परदेशेचाष्टमगोमृत्यु
करएव ११ सौम्ययुतोर्कः सौम्यैः संदृष्टश्चाष्टमर्क्षसंस्थश्च तस्माद्देशादन्यंग
तः सवाच्यः पितातस्य १२ सैवरोगार्त्तस्यमरणंकरोति ११ अथकश्चित्पृच्छतिमदीयः पि

तान्यदेशस्थस्तत्रकिमद्यापितिष्ठतिअथवान्यदेशंगतइतिएतज्ज्ञानमाह सौम्येति अर्कः सूर्यः सौम्यैः
शुभग्रहैर्युतः सहितस्तेषामन्यतमेनचदृष्टोवलोकितोभवति तथाभूतोलग्नाच्चाष्टमर्क्षसंस्थितः तत्सं
स्थोष्टमस्थानमुपगतोभवति तस्माद्देशाद्ग्रामादिकादन्यदेशांतरंगतः तस्यप्रष्टुः पिताजनकः प्राप्तइति
वाच्यः अन्यथातत्रैवस्थितः १२

२६

ष.पं.
२७

मि०
७

तितुलालयः स्मृतादीर्घाइति ह्रस्वंपरिवर्तुलंमध्यमायतंदीर्घम् अंशकपतौसवलेतः असा
रमल्पबलेस्वस्वनीचस्थितेस्तमितेवापिनष्टप्रायमेव एवमंशकाद्वयंज्ञायते द्रेष्काणैर्लग्नत्रि
भागैस्तस्कराश्चौराः स्मृताः उक्ताः यादृशीद्रेष्काणस्याकृतिस्तादृशीएवतस्करस्यवक्तव्या त
द्यथा मेषप्रथमेद्रेष्काणेपुरुषः परशुहस्तः कृष्णोरक्तनेत्रः रौद्रः द्वितीयेद्रेष्काणेस्त्रीलोहितां
बरास्थूलोदरी दीर्घमुखेकपादा तृतीयेद्रेष्काणेपुमान्क्रूरः कपिलोरक्तांबरः दंडहस्तः वृष
स्यप्रथमद्रेष्काणेस्त्रीकुंचितलूनकेशास्थूलोदरीदीर्घपादा द्वितीयेनरः कलावित् लांगलश-
कटकर्मणिकुशलः तृतीयेनरोबृहत्कायः मिथुनस्यप्रथमद्रेष्काणेस्त्रीरूपान्विताहीनप्रजा
द्वितीयेपुरुषः उद्यानसंस्थितः अपत्यरहितः कवचीधनुष्मान् तृतीयेपुमान्रत्नभूषितः पंडि
तोधनुष्मान् कर्कटप्रथमेपुरुषः हस्तीसदृशशरीरः सूकरमुखः द्वितीयेस्त्रीयौवनोपेता
कर्कशाअरण्यस्था तृतीयेपुरुषः सर्पवेष्टितः नौस्थः स्वर्णाभरणान्वितः सिंहप्रथमे
शाल्मलीसंस्थोगृध्रजंतुशुकाननः द्वितीयेपुरुषोधनुष्मान् नताग्रनासः तृतीयेनरः कूर्ची

२७

अधुनाहतस्यार्थस्यस्वरूपंतस्करकालदिग्देशानांज्ञानं तस्करस्यवयोरूपज्ञानंचाह अं
शकादिति अंशकाल्लग्नस्यतात्कालिकस्यनवभागाद्द्रव्यमपहृतं धातुमूलजीवाख्यंतत् ज्ञाय
ते एतत्पूर्वमेवव्याख्यातम् स्वांशेविलग्नेयदिवात्रिकोणइति तस्यचरराशितुल्योवर्णोवक्तन्
व्यः तथाचलघुजातकेप्रोक्तम् अरुणसितहरितपाटलपांडुविचित्रासितेतरपिशंगाः पिंग

अंशकाद्विज्ञायतेद्रव्यंद्रेष्काणैस्तस्कराःस्मृताः
राशिभ्यःकालदिग्देशावयोज्ञातिश्चलग्नपात्
१३ इति श्रीपृथुयशोविरचिताषट्पंचा०समा०

लकर्बुरबभ्रुकमलिनारुचयोयथासंख्यमिति तस्यचदीर्घमध्यन्हस्वत्वंनवांशकवशाज्ज्ञेयम्
तेनचकुंभमीनमेषवृषान्हस्वाःमिथुनकर्कटधन्विमकरामध्याः सिंहवृश्चिककन्यातुलादीर्घाः
तथाचास्मदीयेप्रश्नज्ञाने मेषवृषकुंभमीनान्हस्वायुग्मकर्किचापधरमकराः मध्याहरियुव